# -: संस्कृतसप्ताहमधिकृत्य समायोजितस्य संस्कृतोत्सवकार्यक्रमस्य प्रतिवेदनम् :-

**संस्कृतोत्सवः**

**श्रावण-शुक्लद्वादशीतः भाद्रकृष्णतृतीयापर्यन्तं, १४३२ भास्कराब्दः**

**(०६-०८-२०२५ तः १२-०८-२०२५ पर्यन्तम्)**

प्रतिवर्षमिव अस्मिन्नपि वर्षे श्रावणीपूर्णिमायाम् आयोज्यमानं संस्कृतदिवसमुपलक्ष्य कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालये "संस्कृतोत्सवः" इत्यभिधः सप्ताहात्मककार्यक्रमः (०६ आगष्ट, २०२५ तः १२ आगष्ट, २०२५ पर्यन्तम्) समायोजितः। उत्सवस्यास्य समुद्घाटनं ०६.०८.२०२५ दिनाङ्के विश्वविद्यालयसभागारे विश्वविद्यालयस्य कुलपतिवर्याणाम् आचार्यप्रह्लाद रा. जोशीवर्याणां शुभाशीर्वचोभिः संजातम् । तस्मिन्नेव दिने (०६.०८:२०२५) विश्वविद्यालयस्य शिक्षाविभागेन मध्याह्न-१.००वादनतः विभागीयप्रकोष्ठे संस्कृतसप्ताहमुद्दिश्य विश्वविद्यालयस्य विद्यार्थिषु एका आशुभाषणस्पर्धा समायोजिता।






तस्मिन् दिने एव विश्वविद्यालयसभागारे संस्कृतवेदाध्ययन-धर्मशास्त्रविभागयोः संयुक्ततत्वावधानेन वेदभाष्यस्पर्धापि आयोजिता। पुनः ०६.०८. २०२५ दिनाङ्के एव मध्याह्न-२:३०वादनतः विश्वविद्यालयसभागारे संस्कृतसाहित्यविभागेन श्लोकावृत्तिस्पर्धा आयोजिता। तत्र रघुवंशस्य प्रथमाध्यायस्य श्लोकाः चिता आसन्। तस्मिन् समये एव विश्वविद्यालयस्य असमीयाविभागेन विभागीयप्रकोष्ठे संस्कृतसम्बद्धविषयेषु भाषणस्पर्धा आयोजिता।








पुनः ०७.०८.२०२५ दिनाङ्के मध्याह्न-१:००वादनतः विश्वविद्यालयस्य व्याकरणविभागेन अष्टाध्यायिकण्ठपाठस्पर्धा विश्वविद्यालयसभागारे आयोजिता।

तस्मिन् एव समये राजनीतिविज्ञानविभागेन विभागीयप्रकोष्ठे "भारतीयज्ञानपरम्परा राजनीतिविज्ञानं च" इति विषये विश्वविद्यालयस्य विद्यार्थिषु एका भाषणस्पर्धा आयोजिता । तस्मिन्नेव दिवसे मध्याह्न-२:३०वादनतः विश्वविद्यालयसभागारे न्याय-ज्योतिषविभागयोः संयुक्ततत्त्वावधानेन तर्कसंग्रहकण्ठपाठस्पर्धा आयोजिता । पुनश्च ०७.०८.२०२५ दिनाङ्के एव योगविज्ञानविभागेन विभागीयप्रकोष्ठे मध्याह्न-२:३०वादनतः योगसम्बद्धश्लोकावृत्तिस्पर्धा आयोजिता।









पुनः ०८.०८.२०२५ दिनाङ्के मध्याह्न-१:००वादनतः विश्वविद्यालयसभागृहे संस्कृतमीमांसा-पुराणेतिहासविभागयोः संयुक्ततत्त्वावधानेन विश्वविद्यालयस्य विद्यार्थिषु निबन्धलेखनस्पर्धा आयोजिता।

तस्मिन्नेव दिने मध्याह्न-२:००वादनतः विश्वविद्यालयसभागृहे संस्कृतसर्वदर्शनविभागेन एका संस्कृतगणगीतस्पर्धा आयोजिता। अस्यां स्पर्धायां न केवलं विश्वविद्यालयस्य छात्राः अपि तु विश्वविद्यालयस्य पार्श्ववर्तिमहाविद्यालयानां छात्रा अपि भागग्रहणं कृतवन्तः।








इतोऽपि विश्वविद्यालयस्य दर्शनविभागेन "समाजविज्ञानसंकायस्य माणविकी संकायस्य च विषयेषु भारतीयज्ञानपरम्परायाः महत्वम्" इति विषयस्योपरि एका निबन्धलेखनस्पर्धा छात्राणां मध्ये आयोजिता।

पुनश्च संस्कृतसप्ताहमुपलक्ष्य ०६.०८.२०२५ दिनाङ्कतः सप्ताहं यावत् विश्वविद्यालयपक्षतः एका भ्राम्यमानसंस्कृतविज्ञान-प्रदर्शनी अपि आयोजिता। विश्वविद्यालयस्य बसयानस्य भितरि कल्पिता एषा प्रदर्शनी नलबारीनगरस्य विविधस्थलेषु तथा च विविधविद्यालयानाम्, महाविद्यालयानां च समीपं गत्वा प्रदर्शिता अभवत्।






पुनः संस्कृतोत्सवस्य अङ्गरूपेणैव पार्श्ववर्तिषु विभिन्नेषु विद्यालयेषु विविधाः स्पर्धाः विश्वविद्यालयेन सञ्चालिताः।

तत्र ०८.०८.२०२५ दिनाङ्के असम भेली एकाडेमी जुनियर कालेज, नलबारी इत्यस्य सहयोगेन तस्मिन्नेव महाविद्यालये तत्रत्य-छात्राणां कृते विश्वविद्यालयपक्षतः एका संस्कृतसुभाषितकण्ठपाठस्पर्धा आयोजिता।

पुनः शंकरदेव एकाडेमी इत्यस्य सहयोगेन तस्मिन् एव महाविद्यालये ०९.०८.२०२५ दिनाङ्के तत्रत्य-छात्राणां कृते गीतापाठस्पर्धा विश्वविद्यालयपक्षतः आयोजिता।

एवमेव बगुरिहाटी उच्चतर माध्यमिकविद्यालयः इत्यस्य सहयोगेन ०९.०८.२०२५ दिनाङ्के तस्मिन्नेव विद्यालये विद्यालयस्य छात्राणां मध्ये एका संस्कृतगणगीतस्पर्धा विश्वविद्यालययक्षतः आयोजिता।









पुनश्च शंकरदेव शिशु निकेतन इत्यस्य सहयोगेन ०९.०८.२०२५ दिनाङ्के विद्यालयसभागृहे छात्राणां कृते विश्वविद्यालयपक्षतः संस्कृतसुभाषितकण्ठपाठस्पर्धा आयोजिता।

०९.०८.२०२५ दिनाङ्के लुइत एकाडेमी जुनियर कालेज, धमधमा इत्यस्य सहयोगेन तस्मिन् महाविद्यालये एव तत्रत्य-छात्राणां मध्ये विश्वविद्यालयपश्वतः गीतापाठस्पर्धा आयोजिता।

एवमेव देवीराम पाठशाला उच्चतर माध्यमिक विद्यालयः इत्यस्य सहयोगेन ०९.०८.२०२५ दिनाङ्के तस्मिनेव विद्यालये तत्रत्य-छात्राणां कृते एका गीताश्लोकावृत्तिस्पर्धा विश्वविद्यालयपक्षतः आयोजिता।








पुनः १२.०८.२०२५ दिनाङ्के अस्य सप्ताहात्मकसंस्कृतोत्सवस्य समापनसमारोहः विश्वविद्यालयप्राङ्गणे समायोज्यते । उक्तसमारोहे बृहत्तरनलबारीस्थ-विशिष्टसंस्कृत-सेविविदुषां पञ्चानां विश्वविद्यालयपक्षतो विशेषसम्मानं विधीयते तथा चात्र मुख्यातिथित्वेन उपस्थिता आसन् गौहाटीविश्वविद्यालयस्य संस्कृतविभागस्य पूर्वविभागाध्यक्षाः राष्ट्रपतिपुरस्कारेण सम्मानिताः आचार्यराजेन्द्रनाथशर्ममहोदयाः।

सभायां राजेन्द्रनाथशर्मवर्यः, पयोधरमिश्रवर्यः, विरेण मिश्रवर्यः, अम्बेश्वर भागवतीवर्यः, दुर्गाकिङ्कर शर्मावर्यः इत्येते संस्कृतसेविपण्डिताः विश्वविद्यालयपक्षतः विशेषतया सभाजिताः । सहैव समारोहेऽस्मिन् संस्कृतोत्सवमुपलक्ष्य समायोजितानां विद्यालय-महाविद्यालय-विश्वविद्यालयस्तरीयाणां सर्वासां स्पर्धानां पुरस्कारा अपि स्थानप्रापकविद्यार्थिभ्यो वितीर्यन्ते । एवं प्रकारेण कुमारभास्करवर्मसंस्कृत-पुरातनाध्ययनविश्वविद्यालये संस्कृतसप्ताहमुपलक्ष्य आयोजितः संस्कृतोत्सवः भव्यरूपेण सुसम्पन्नः।







